संस्कृत प्रयोग

क्र-नं. १२९ भूतशुद्धिः

✓ ३२००

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ अथ भूतशुद्धिः
उत्पतंति हि भूतानि पृथिव्यंतरवासिनः ॥ आसनादौ
नमस्कृत्य ब्रह्मकर्म समारभेत् ॥ इत्यासनादि भूत
शुद्धिं कृत्वा ॥ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिता
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ इति भू
मौ वामपादेन पार्ष्णिघातत्रयं कृत्वा ॥ पृथिवीति मंत्र
स्य ॥ मेरुपृष्ठ ऋषिः ॥ कूर्मो देवता ॥ सुतलं छंदः ॥
आसने विनियोगः ॥ पृथिवी त्वया ० धृता ॥ त्वं च धार०
सनं ॥ इति पृथिवी प्रार्थनां कुर्यात् ॥ अपक्रामंतु भूता ॥ १ ॥
नि पिशाचाः सर्वतो दिशं ॥ सर्वेषामविरोधेन ब्रह्मक

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1A)

र्मसमारभेत॥ तीक्ष्णदंष्ट्र महाकायं कल्पांतदहनोप
मं॥ भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि॥ इति क्षे
त्रपालं नत्वा॥ ऊर्ध्व केशी इति मंत्रेण शिखाबंधनं॥ पृ
थिवीस्यासने उपविश्य॥ ॐ नमः कूर्मकासनाय नमः॥
विमलासनाय नमः॥ कूर्मासनाय॰॥ अनंतासना
य॰॥ पद्मासनाय॰॥ योगासनाय॰॥ तन्मध्ये परमसु
खासनाय नमः॥ ॐ [illegible] विश्वरों परमात्मनेनमइ
दमासनं कल्पयामि॥ स्वशिरसि गुरुं गुरुभ्यो नमः॥
पं परमगुरुभ्यो नमः॥ पं परात्परगुरुभ्यो नमः॥ पंप
रमेष्ठिगुरुभ्यो नमः॥ दक्षिणभुजे दुं दुर्गायै नमः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

वामभुजे गं गणपतये नमः॥ दक्षिणजानौ क्षं क्षेत्रपा
लाय॥ वामजानौ सं सरस्वत्यै नमः॥ हृदये पं परमा
त्मने॥ ॐ लं ह्लीं क्लीं इति करशुद्धिं कृत्वा॥ ॐ प्रणव
स्य परब्रह्म ऋषिः॥ परमात्मा देवता॥ गायत्री छंदः॥
प्राणायामे विनियोगः॥ [illegible]कंद समुद्भूतं ज्ञानना
लं सुशोभितं॥ ऐश्वर्या[illegible]पेतं परं वैराग्यकर्णि
कं॥ इति हृत्पद्मं ध्यायेत्॥ प्रणवेनोर्ध्वमुखं कुर्यात्॥
प्रणवेन विकसितं॥ ॐ हंसः हंस इति जीवात्मानो प
रमात्मानोरैक्यं कृत्वा॥ भूतशुद्धिं ततः कृत्वा निर्दहे
त्पापपूरुषं॥ संप्लाव्य शुद्धया देहं शोषयेत्पवनेन ॥२॥
च॥ नाभेरधो वामभागे पापपुरुषं विचिंतयेत्॥ ब्र

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A) ब्रह्महत्याशिरस्कंच स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संसर्गपदद्वंद्व मंगप्रत्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रु विलोचनं॥ अन्वेतनमधो वक्त्रं दग्धपातकसन्निभ॥ खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिंतयेत्॥ बीजेन संदहेत्॥ यं। ७। वायुबीजेन संशोष्य॥ रं। ७। अग्निबीजेन संदह्य॥ वं। ७। अमृतबीजेन संप्लाव्य॥ लं। ७। पृथिवीबीजेन पिंडीकरणं॥ हं। ७। आकाशबीजेन देहनिष्पत्तिः॥ इति परमात्मा स्वरूपं शरीरं भावयित्वा॥ अस्य श्री पंचमहाभूतमंत्रस्य। आत्रेय भरद्वाज ब्रह्मेंद्रियेश्वरा ऋषयः॥ त्रिष्टुप् अनुष्टुप् बृहती पंक्ति छंदांसि॥ समीरणाग्निवरुणपृथिव्या

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3) काश्यो देवता॥ पंचमहाभूतशुध्यर्थं जपे विनियोगः॥
अस्य श्रीपार्थिवमंत्रस्य ब्रह्मा ऋषिः॥ इंद्रो देवता त्रिष्टुप्
छंदः॥ पार्थिवाख्यभूतशुध्यर्थं जपे वि०॥ पादादिजानु
पर्यंतं पृथिवीस्थानं॥ तत्र पार्थिवमंडलं। चतुरस्रम
ष्टदिग्वज्रलांछितं। तन्मध्ये लं बीजं॥ पीतवर्णं॥ तेन पंचगु
णा पृथिवी षडुद्धात प्रयोगेण शोषयामि॥ लं। ७२॥ अस्य
श्रीवरुणमंत्रस्य गोतम ऋषिः॥ सोमो देवता॥ अनुष्टुप्
छंदः॥ वरुणाख्यभूतशुध्यर्थं जपे वि०॥ जान्वादिनाभि
पर्यंतं। आपस्थानं। तत्र वरुणमंडलं धनुराकारं उभयोः ॥२॥
= कोष्ठाः श्वेतपद्मदलांछितं। तन्मध्ये वं बीजं। शुक्लव
र्णं। तेन चतुर्गुणा आपः पंचोद्धातप्रयोगेण शोषयामि॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वं ।९०। अस्य श्री आग्निमंत्रस्य कश्यप ऋषिः ॥ अनुष्टु
(3A) प्छंदः ॥ जातवेदाग्निर्देवता ॥ आग्नेयाख्य भूतशुध्य
र्थे जपे वि० ॥ नाभ्यादि हृदयपर्यंतं अग्निस्थानं तत्राग्नि
मंडलं । त्रिकोणाकारं स्वस्तिकलांछितं तन्मध्ये रं बीजं ॥
रक्तवर्णं । तेन अग्निस्त्रिगुणाभ्वतुरुद्धातप्रयोगेण शो
षयामि ॥ रं । ८८ । अस्य श्री वायुमंत्रस्य किष्किंध ऋषिः ।
बृहतीछंदः । महावायुर्नभुवरूपी देवता ॥ वायव्याख्य
भूतशुध्यर्थ जपे वि० ॥ हृदयादि भ्रूमध्यपर्यंतं वायुस्था
नं तत्र वर्तुलं बिंदुभिः षड्भिरंकितं । तन्मध्ये यं बीजं नीक
वर्णं तेन द्विगुणा वायुः त्रिरुद्धातप्रयोगेण शोषयामि ॥
यं । ८४ । अस्य श्री आकाशमंत्रस्य । ब्रह्मा ऋषिः ॥ पंक्ति

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५) छंदः॥ आकाशो देवता॥ आकाशाख्य भूतशुध्यर्थे
जपे वि०॥ भ्रूमध्यादि ब्रह्मरंध्रपर्यंतं। आकाशस्थानं।
तत्र वर्तुलं। नभोमंडलं तन्मध्ये हं बीजं। स्वच्छवर्णं। तेनै
कगुणं नभः द्विरुद्घात प्रयोगेण शोषयामि॥ ॐ हं। २४।
एवं भावइत्वा॥ शरीरस्थ पंचभूतानि सबीजानि तत्त
द्वीजादि क्रमेण तानि प्रविलापयिष्ये॥ पृथिवीपंच
गुणानां षड्उद्घात प्रयोगेण शोषयामि॥ हां स्वाहा॥
पृथिवीं अप्सु प्रविलापयामि॥ आपश्चतुर्गुणास्ताः
पंचोद्घातप्रयोगेण शोषयामि॥ ह्रीं स्वाहा॥ वं।६। अ ॥४॥
पोग्नौ प्रविलापयामि॥ अग्निस्त्रिगुणाश्चतुरुद्घात
प्रयोगेण शोषयामि॥ हूं स्वाहा। रं। अग्निं वायुं प्रवि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(4A)

लापयामि। वायुर्द्विगुणस्त्विरुद्धातत्प्रयोगेण
शोषयामि। हैं स्वाहा। यं शं वायुमाकाशे प्रविलाप
यामि। आकाश एकगुणयुक्तद्विरुद्धातप्रयोगेण
शोषयामि। हौं स्वाहा। हां शं आकाशं पंचतन्मात्रा
हंकारं महदात्मिकां यामात्रकासंज्ञकं ब्रह्मस्वरू
पमायायां प्रविलापयामि। मायावानिर्वचनीयछा
तामेकोद्धातप्रयोगेण शोषयामि। हीं स्वाहा॥ त
थाविधमायां नित्यशुद्धबुद्धमुक्तस्वप्रकाशवत्या
गात्मस्वरूपे सत्यज्ञानानंतलक्षणे परमार्थ
भूते परब्रह्मणि प्रविलापयामि॥ हीं स्वाहा॥
एवं शोषयित्वा यथोक्तस्वरूपात्म॥ ॐ हे ले रवार्थे

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

भूता सर्वमंत्रमयमात्‌ कासंज्ञक सत्यब्रह्मस्व
रूपंमायारज्जुसर्पवद्विवर्त्तरूपेणप्रादुर्भूतोहीं
सत्यमायायायथोक्तलक्षण आकाशाउत्पंनः॥
ॐ हं। आकाशाद्वायुरुत्पंनः। ॐ यं। वायोरग्नि
रुत्पंनः॥ ॐ रं। अग्नेरापउत्पंनः। ॐ वं। अद्भ्यः
पृथिवीउत्पंन। ॐ लं। एभ्योपंचभूतेभ्यः स
काशात्स्वशरीरं तेजोमयंपुष्पात्मकंसकलपु
रुषार्थसाधनंसमस्तगुरुदेवतामयंसदाशिवा
राधनयोग्यंपरमैश्वर्यशरीरवत्‌॥ अकर्मभुक्ष
विद्यामयमुत्पन्नं तस्मिन्शरीरेसर्वशंसर्वा ॥५॥
त्मकंसर्वेश्वरं सर्वशक्तिसमंन्वितं॥ सच्चिदानं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

दात्मकब्रह्मस्वरूपेणानुप्रविष्टमिति ॥ सच्चिदा
नंदाद्वयब्रह्मैवाहमस्मि ॥ देहेंद्रियबुध्याहंकारा
दयो नाहं कर्ता नाहं भोक्ता नाहं संसारी ब्रह्मैवाह
मस्मि ॥ असंगोस्मि ॥ अमृतोहमस्मि ॥ अक्षयो
हमस्मि ॥ इति भूतशुद्धिः ॥ ॥ अथ प्राणप्रति
ष्ठा ॥ मम सर्वानुष्ठानसंपूर्णफलसिध्यर्थं प्राण
प्रतिष्ठां करिष्ये ॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ॥ ब्र
ह्माविष्णुमहेश्वरा ऋषयः ॥ ऋग्यजुःसामाथर्वणा
नि छंदांसि ॥ सृष्टिस्थितिसंहारकारिणी परा प्राण
शक्तिर्देवता ॥ आं बीजं ॥ ह्रीं शक्तिः ॥ क्रों कीलकं ॥
प्राणप्रतिष्ठासिध्यर्थं जपे विनियोगः ॥ अं आं ह्रीं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

क्रौं अं कं खं गं घं ङं पृथिव्यप्तेजोवायुराकाशात्म
ने क्रौं ह्रीं आं अंगुष्ठाभ्यां नमः। हृदयाय नमः।
ॐ आं ह्रीं क्रौं इं चं छं जं झं ञं शब्दस्पर्शरसरूपगं
धात्मने क्रौं ह्रीं आं ई तर्जनीभ्यां०। शिरसे स्वाहा॥
ॐ आं ह्रीं क्रौं उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वा
घ्राणात्मने क्रौं ह्रीं आं ऊं मध्यमाभ्यां०। शिखायै व
षट्॥ ॐ आं ह्रीं क्रौं ऐं तं थं दं धं नं वाक्पाणिपादपा
युपस्थानात्मने क्रौं ह्रीं आं ऐं अनामिकाभ्यां०। कव
चाय हुं॥ ॐ आं ह्रीं क्रौं ऐं पं फं बं भं मं वचनावचना ॥६॥
दानादानादानागमनानमपिसर्वानंदात्मने क्रौं ह्रीं
आं ऐं कनिष्ठिकाभ्यां०। नेत्रत्रयाय वौषट्॥ ॐ
आं ह्रीं क्रौं यं रं लं वं शं षं सं हं ळं क्षं अं। मनोबुद्धिर

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

हंकारचित्तचैतन्यात्मने क्रों ह्रीं आं अः क्ष र त ळ क्ष
र पं षाः स्यां ॥ अस्त्राय फट् ॥ इति दिग्बंधः ॥ परोरज
सि सावदों ॥ हुं फट् स्वाहा ॥ ॐ इति नाशः ॥ आं पादौ ॥
ह्रीं इति हृदयादा नाभिः ॥ क्रों मिति मस्तकादा हृद
यं व्याप्य ॥ ॐ यं त्वगात्मने नमः ॥ ॐ रं रक्तात्मने न
मः ॥ ॐ लं मांसात्मने न ॥ ॐ वं मेदात्मने न० ॥ ॐ रां
अस्थ्यात्मने ॥ ॐ षं म ज्जा मने ॥ ॐ सं शुक्रात्मने ॥
इति हृत्पद्मस्य वा अग्नौ इंद्र वरुणने ऋतिसोम रुद्र इन्द्र त
राजादि दिग्दळेषु विन्यस्य ॥ हंसः सोहं इति समष्ट्
शिरः प्रभृति पादांतं व्यापयेत् ॥ ॥ अथ ध्यानं ॥ र
क्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा क

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७)

राज्ञैः पाशांकुशं कोदंडमिक्षुद्भवगुणमथमप्यं कुशांपं
चबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता
पीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखक
री प्राणशक्तिः परानः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं
सं हं लं हं सः अमुष्यदेहस्थ मे दो स्थि म ज्जा शुक्लः
प्राणजीवानाकर्षय आकर्षय ॥ अमुष्य प्राणाः । ॐ
आं ह्रीं क्रों अमुष्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों
यं यं यं यं यं यं वं हं सः अमुष्य वाक्पाणिपादपायु
पस्थश्रोत्रत्वक्चक्षुजिह्वाघ्राणप्राणाः ॥ ॐ आं ॥७॥
ह्रीं क्रों रं रं रं रं रं रं हं सः अमुष्य इहैवागत्य सुखंचि
रंतिष्ठंतु स्वाहा ॥ ॐ आं ह्रीं क्रों इति प्राणप्रतिष्ठा

(9A)

पनं॥ममप्राणमंत्रदेवताप्राणममजीवमंत्रदेवता
जीवइहस्थिताः॥ममसर्वेंद्रियाणिमंत्रदेवताकाय
वाङ्मनस्त्वक्चक्षुश्रोत्रजिह्वाघ्राणप्राणमंत्रदेवता
इहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥क्रोंह्रींॐआंसो
हं॥इतिद्वादशवारंजपित्वा॥ ॥अस्यश्रीमातृकास
रस्वतीमंत्रस्य।ब्रह्माऋषिः।मातृकासरस्वतीदेवता
पंक्तिछंदः।हलोबीजानिस्वराःशक्तयः।बिंदवःकि
लकं।मातृकासरस्वतीप्रसादसिध्यर्थेजपेविनि
योगः॥ॐअंकंखंगंघंङंआं।अंगुष्ठाभ्यां०।ॐइं
चंछंजंझंञंईं।तर्जनीभ्यां०।ॐउंटंठंडंढंणंऊं।म
ध्यमाभ्यां०।ॐएंतंथंदंधंनंऐं।अनामिकाभ्यां०।

(8)

ॐ ॐ पं फं बं भं मं। औं कनिष्ठिकाभ्यां०। ॐ अं यं रं लं वं
शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्यां०। एवं हृदया
दि। अथ ध्यानं॥ पञ्चाशद्वर्णभेदैर्विहितवदनदोःपा
दयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशि
कलामिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिंतालि
खितवरकरां त्रीक्षणां पद्मसंस्थां अच्छाकल्पामतुच्छ
स्तनजघनभरां भारतीं तां नमामि॥ ॐ अं मूर्ध्ने न
मः। ॐ आं मुखाय०। ॐ इं ईं चक्षुर्भ्यां०। ॐ उं ऊं श्रोत्रा ॥८
भ्यां०। ॐ ऋं ॠं नासापुटयोः इत्कारादिमातृकासव्यदक्षिणे स्पृष्टा
टाय०। ॐ लृं लॄं कपोलाभ्यां०। ॐ एं ऐं ओष्ठाभ्यां०।
ॐ ओं औं दंतपंक्तिभ्यां०। ॐ अं मूर्ध्ने नमः। ॐ अः आ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A) स्यायनमः॥ॐ कं खं गं घं ङं दक्षिणहस्तसंध्यग्रेभ्यो
नमः॥ॐ चं छं जं झं ञं वामहस्तसंध्यग्रेभ्यो॥ॐ टं
ठं डं ढं णं दक्षिणचरणसंध्यग्रेभ्यो॥ॐ तं थं दं धं नं
वामचरणसंध्यग्रेभ्यो॥ॐ पं फं कुक्षिभ्यां॥ॐ बं प
ष्ठ्येनमः॥ॐ भं नाभ्ये॥ॐ मं जठराय॥ॐ यं त्वगा
त्मने हृदयाय॥ॐ रं असृगात्मने दोर्मूलकाय॥ॐ लं
मांसात्मने अपरकुकाय॥ॐ वं मेदात्मने कक्षाय॥
ॐ शं अस्थ्यात्मने दक्षिणहस्ताय॥ॐ षं मज्जात्मने
वामहस्ताय॥ॐ सं शुक्रात्मने दक्षिणचरणाय॥ॐ
हं प्राणात्मने वामचरणाय॥ॐ लं सत्वात्मने जठरा

"A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१)

यं॥ॐ क्षं आत्मने सुखाय॥ ॐ॥ अ आ इ ई उ ऊ ऋ ॠ
ऌ ॡ ए ऐ ओ औ अं अः॥ अकारादि षोडशस्वरान्
कंठस्थाने षोडशचक्रे न्यसामि॥ क ख ग घ ङ च छ
ज झ ञ ट ठ ककारादि द्वादशवर्णान् हृदिस्थाने अ
नाहतचक्रे द्वादशादले न्यसामि॥ ड ढ ण त थ द ध न
प फ डकारादीन् दशवर्णान् नाभिस्थाने मणिपूरके द
शदले न्यसामि॥ ब भ म य र ल बकारादीन् षट् वर्णा
नि लिंगस्थाने स्वाधिष्ठान चक्रे षट् दले न्यसामि
व श ष स वकारादीन् चतुरो वर्णा गुदलिंगांतरे आ
धारचक्रे चतुर्दले न्यसामि॥ ॥ अस्य श्रीअंतर्मातृ
का मंत्रस्य। ब्रह्मा ऋषिः॥ मातृकासरस्वती देवता॥

पंक्तिः छंदः॥ हक्लो बीजानि। स्वराः शक्तयः। बिंदवः कि
लकं॥ श्री अंनमातृका सरस्वती प्रसाद सिध्यर्थं जपे
२ अं विनियोगः॥ ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां० हृदया
य० ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां० शिरसे स्वाहा॥ ॐ
(9A) उं टं ठं डं ढं णं ऊं मध्यमाभ्यां० शिखायै वषट्॥ ॐ एं तं
थं दं धं नं ऐं अनामिकाभ्यां० कवचा० ॐ ओं पं फं बं भं
मं औं कनिष्ठिकाभ्यां० नेत्रत्रयाय० ॐ अं यं रं लं वं शं
षं सं हं ळं क्षं अः करतलकरपृ० अस्त्राय०॥ आधारे लिंग
नाभौ प्रकटित हृदये तालुमूले ललाटे द्वे पत्रे षोड
द शारे द्विदशदशदके द्वादशार्धे चतुष्के॥ वासांतै मध्ये बाक

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१०) उफकंठसहितंकंठदेशेस्वराणांहंक्षांतस्वार्थयुक्तंसक
कंदकगतंवर्णरूपंनमामि॥ॐवंनमः।शंनमः।षंन
मः।संनमः।इत्याधारे॥ॐबंनमः।भंनमः।मंनमः।यं
नमः।रंनमः।लंनमः।इतिलिंगस्थाने॥ॐडंनमः।
॥ १०॥ ढंनमः।णंनमः।तंनमः।थंनमः।दंनमः।धंनमः।नंनमः।न ५
पंनमः।फंनमः।इतिनाभिस्थाने॥ॐकंनमः।खंन
मः।गंनमः।घंनमः।ङंनमः।चंनमः।छंनमः।जंनमः।
झंनमः।ञंनमः।टंनमः।ठंनमः।इतिहृदिस्थाने॥ॐ १०
अंनमः।आंनमः।इंनमः।ईंनमः।उंनमः।ऊंनमः।ऋं
नमः।ॠंनमः।ऌंनमः।ॡंनमः।एंनमः।ऐंनमः।ओं
नमः।औंनमः।अंनमः।अःनमः।इतिकंठस्थाने॥

(10A)

हंनमः। क्षंनमः। इति षट्कमध्ये॥ आधारे लिंगनाभौ
इति ध्यात्वा॥ ॥अस्य श्री कंठादिमातृकान्यासस्य।
अंबरीषऋषिः। अनुष्टुप् छंदः। अर्धनारीनटेश्वरो
देवता॥ हक्लौ बीजानि। स्वराः शक्तयः। ज्ञानविज्ञाना
ॐ र्थे जपे वि०॥ ॐ ह्रौं ज्रं सः ॐ अं कं खं गं घं ङं आं अंगु
ह्रौं ज्रं सः ष्ठाभ्यां० हृदयाय०। ॐ ईं चं छं जं झं ञं ईं तर्जनीभ्यां०।
ह्रौं ज्रं सः ॐ शिरसे०। ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां०। शिखायै०।
ॐ एं तं थं दं धं नं ऐं अनामि०। कवचाय०। ॐ ओं पं फं बं
भं मं औं कनि०। नेत्रत्रय०॥ ॐ ह्रौं ज्रं सः ॐ अं यं रं लं वं शं
षं सं हं ळं क्षं अः करतल०। अस्त्राय०॥ ॐ ह्रौं ज्रं सः इत्या
रभ्य समाप्यं तं अंगुलीन् हृदयादिन्यासः॥ अथ ध्या

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(11) नं ॥ सिंदूरकांचनसमोभयभागमर्धनारीश्वरं गि
रिसुताहरभूषचिन्हं ॥ पाशोभयाक्षवलये दृहहस्त
मीशं संस्मरन्त्वान्यसेत्स्तवकं वांछितवस्तुसिध्ये ॥ इति
ध्यानं ॥ ॐ ह्रां जं सः ॥ ॐ श्रीकंठेशाय पूर्णोदर्यै नमः ॥
इति मस्तकं ॥ ॐ आं विरजानुभ्यां ॥ आननवृत्ता
यइत्यादि स्थानेषु न्यसेत् ॥ ॐ इं सूक्ष्मेषु शाल्मली
भ्यां ॥ दक्षिणनेत्रे ॥ ॐ ईं मूर्तीश्चालोलाक्षीभ्यां ॥
वामनेत्रे ॥ ॐ उं अमरेश्वरवर्तुलाक्षीभ्यां ॥ दक्षि
णकर्णे ॥ ॐ ऊं अर्धीशघोणाभ्यां ॥ वामकर्णे ॥ ११
ॐ ऋं भारतीशदीर्घमुखाभ्यां ॥ दक्षिणनासापु
टे ॥ ॐ ॠं स्थलीशदीर्घकूटिभ्यां ॥ वामनासापुटे ॥ ॐ लृं

(41A)

स्थानीशादीर्घजिह्वाभ्यां० दक्षिणकपोले ॥ ॐ लृं ह
रेशाकुंडोदरीभ्यां० वामकपोले ॥ ॐ एं कंठीशोर्ध्वके
शीभ्यां० ऊर्ध्वोष्ठे ॥ ॐ ऐं भौतिकेशावक्रतमुखीभ्यां० ।
अधरोष्ठे ॥ ॐ ओं सद्योजातेशज्वालामुखीभ्यां० ऊ
र्ध्वदंतपंक्तौ ॥ ॐ औं अनुग्रहेशोल्कामुखीभ्यां० ।
अधोदंतपंक्तौ ॥ ॐ अं अक्रूरेशश्रीमुखीभ्यां० मूर्ध्नि ॥
ॐ अः महासेनेशाविद्यामुखीभ्यां० कंठे ॥ ॐ कं
क्रोधीशामहाकालीभ्यां० दक्षिणबाहुमूले ॥ ॐ खं
चंडीशासरस्वतीभ्यां० दक्षिणकूर्परे ॥ ॐ गं पंचां
तकेशागौरीभ्यां० दक्षिणमणिबंधे ॥ ॐ घं शिवोत्त
मशात्रैलोक्यविद्याभ्यां० दक्षिणांगुलिमूले ॥ ॐ ङं

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(12) एकरूरेश्वरामंत्रशाक्तिभ्यां० दक्षिणांगुल्यग्रे॥ ॐ चं
कूर्मेश्वरात्मकशाक्तिभ्यां० वामबाहुमूले॥ ॐ छं रुद्रे
श्वराएकनेत्रिणीभ्यां० वामकूर्परे। ॐ जं चतुराननें
श्वरायलंबोदर्यै० वाममणिबंधे॥ ॐ झं अजेश्वरा
यद्भाविणीभ्यां०। वामांगुलिमूले॥ ॐ यं सर्वेश्वरान
गरीभ्यां० वामांगुल्यग्रे॥ ॐ टं सोमेश्वरचरणी
भ्यां० दक्षिणपादमूले॥ ॐ ठं लांगलेश्वरामजरी
भ्यां० दक्षिणजानुनि॥ ॐ डं दारुकेश्वरारूपिणी
भ्यां० दक्षिणगुल्फे॥ ॐ ढं अर्धनारीश्वराचारि ९२
णीभ्यां० दक्षिणपादांगुलिमूले॥ ॐ णं उमाकां
तेश्वरावकोदरीभ्यां० दक्षिणपादांगुल्यग्रे॥ ॐ

तंआषाढीन्द्राप्तनाभ्यां०।वामपादमूले॥ॐ तैंदं थं
(12A) डीन्द्रामद्रकालीभ्यां०।वामजानुनि॥ॐ दंअत्रीन्द्रा
योगिनीभ्यां०।वामगुल्फे॥ॐ धंमीनेन्द्रांखिनीभ्यां०।
वामपादांगुलिमूले॥ॐ नंमखेन्द्रागर्जनीभ्यां०।
वामपादांगुल्यग्रे॥ॐ पंलोहनेन्द्राकाकरात्रीभ्यां०।
दक्षिणपार्श्वे॥ॐ फंन्द्रांखेन्द्राकुंडलीनीभ्यां०।वाम
पार्श्वे॥ॐ बंरूकगंडेन्द्राकपर्दिनीभ्यां०।पृष्ठे॥ॐ
भंहरिदेन्द्रावज्रेभ्यां०।नाभौ॥ॐ मंमहाकालेन्द्राज
याभ्यां०।जठरे॥ॐ यंबाकैन्द्रासुमुखेश्वरीभ्यां०।
हृदये॥ॐ रंरक्तजगरेवतीभ्यां०।दक्षिणांसे॥

(13)

ॐ लं पिनाकीशमाधवीभ्यां० वामांसे॥ ॐ वं रव
ीशवारुणीभ्यां० अपरगले॥ ॐ शं केशवेशवा
यवीभ्वरीभ्यां० हृदादिदक्षिणपाणौ व्यापकं न्यसे
त॥ ॐ षं श्वेतेशरक्षोपधारिणीभ्यां० हृदादिवा
मपाणौ व्यापकं न्यसेत॥ ॐ सं त्त्रगवीशसहजाभ्यां०
हृदादिदक्षिणपादे व्यापकं न्यसेत॥ ॐ हं हृदादि
वामपादे व्यापकं न्यसेत॥ ॐ लं त्रिवेशव्यापिनी
भ्यां० हृदादिमस्तकांते व्यापकं न्यसेत॥ ॐ क्षं
सर्वत्रेशमहामायीभ्यां० मूर्ध्नि॥ अथ ध्यानं॥ अ ९३
क्षस्त्रजं हरिणपोतमुदग्रटंकं विद्यांकुरैरविरतं

(13A)

दधतीं त्रिनेत्रां॥ अर्धेंदुमौलिमरुणामरविंदसंस्थां
वर्णेश्वरीं प्रणतनस्तनभारनम्रां॥ ॥मातृकासमाप्तः॥ अथमंत्राचमनं॥ ॐ आत्मतत्वायनमः॥
विद्यातत्वायनमः॥ शिवतत्वायनमः॥ एभिर्मंत्रैराचमनंविधाय॥ पश्चान्मूलमंत्रेणप्राणायामंकृत्वा॥
॥ ॥इतिश्रीशुद्धिप्रकरणेशुद्धिप्राणप्रतिष्ठाबहिर्मातृकाअंतर्मातृकाश्रीकंठादिमातृकासमाप्तः॥
॥श्री॥ ॥छ॥ शाके१७००विलंबीसंवत्सरेचैत्रशुद्धप्रतिपदा तद्दिनीरूपनामअरणकेसदाशिव
भट्टा॥मजकूरपोंडुनाम्नालिखितं॥वास्तव्यमसूर॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com